Shri Raghunatha Temple MSS. Library,
५६०३ JAMMU

१२४३
No. क

Title बटुकभैरवसहस्रनाम

Author

Extent ५ पत्र Age

Subject तन्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

बटुकभैरवसहस्रना०

खड्गमालास्तोत्र

नं० १२४२

5703
F-5
Complete

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

व॰भै॰
प॰१

ॐश्रीगणेशायनमः अथवटुकभैरवसहस्रनामलि
ख्यते श्रीमहादेवउवाच देवेशिभक्तिसुलभेदेवनायकवं
दिते भक्तानांकामसिद्ध्यर्थंनिदानंब्रूहितत्वतः विनैवन्या
सजालेनपूजनेनविनाभवेत् विनाकायादिक्लेशेनविनव्य
यवितेश्वरि श्रीदेव्युवाच अस्यश्रीआपदुद्धारवटुकभैरव
सहस्रनामस्तोत्रमंत्रस्य ब्रह्मानंदभैरवऋषिः त्रिष्टुप्छं
दः आपदुद्धारवटुकभैरवोदेवता ॐवंबीजं ॐह्रींशक्तिः

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ह्रींकीलकं श्रीमापदुद्धारवटुकभैरवप्रीत्यर्थेपाठे
विनियोगः ॐकारकलितकः इतिध्यात्वापठेत् वटुकः
कामदोनाथोनाथः प्रियः प्रभाकरः भैरवोभीतिहादर्पःकं
दर्पोमीनकेतनः रुद्रोवटुर्विभूतीशोभूतनाथोःप्रजाप
तिः दयालुःक्रूरईशानोजनेशोलोकवल्लभः देवोदैत्य
श्रेष्ठोवीरोवीरवंद्योदिवाकरः बलिप्रियःसुरश्रेष्ठःकनि
ष्ठोनैष्ठिकःशिपदः महाबलोमहातेजावितेजायक्तनिब

© Dharmartha Trust J&K. Digitized by eGangotri

क. भै. र्धनः तेजस्वीवीर्यवान्हृष्टोविहृष्टोभूतनायकः बाल
प. २ कःपालकःकामोविकामःकाममर्द्दनः कालिकार
2 मणःकालीनायकः कालिकाप्रियःकालीशःका
लिकाकांतःकालिकानंदवर्धनः कालिकाहृदयः
ज्ञातीकालिकातनयोनयः खेगेशःखेचरःखेटोवि
शिष्टाखेटकप्रियः कुमारःक्रोधनःकालीप्रियःपर्व
तरक्षकः गणेशोगणाध्योगृष्ठोगृष्ठाश्रयोगणेश्वरः

© Dharmartha Trust J&K. Digitized by eGangotri

गणनाथोगणश्रेष्ठोगणमुख्योगणप्रियः घोरनादोघ
नघोषोघनद्युतिर्घनात्मकः घणनाथोघणेशानोघन
पतिर्घनात्मकः चंपकाभश्चिरंजीवीचंडवेषश्चराचरः
चिंत्योचिंत्यगुणोधीमानचिंतश्चित्तीश्वरः छत्रीछ
त्रपतिश्छेत्ताछिन्नमस्तामनःप्रियः छिन्नाभश्छिन्न
संतापश्छेदशाःछदनांतकः जेताजिष्णुर्जडीशानोज
नार्दनोजनेश्वरः जनकोजनसंतोषोजनजाड्यविना

© Dharmartha Trust J&K. Digitized by eGangotri

व॰भे॰
पं॰३
3

शाकः जालंधरस्थोजननाराध्योजननाथ्यवद्दोजनप्रियः
जीवहाजीवदोजंतुर्जीवनाथोजनेश्वरः जयदोजि
त्वरोजिल्लुर्जयश्रीर्जयवर्धनः जयभूमिर्जयाकारोजय
हेतुर्जयेश्वरः झकारश्चंदनंतात्माझकारहेतुरात्मभूः
झंकाकरीर्धतीभर्ताविभर्ताश्चरात्मकेश्वरः टीत्कारश्चूद
मेयात्माटंकेशोटंकनायकः ठकारभूःठचन्द्रीशोगा
रिष्टठक्कुरःपविः ढुंढिर्ढक्काप्रियःपांथोढुंढिरा

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञो निरर्थकः तामसस्तमीश्वरस्तातातीर्थराजस्तडित्प्रियः
तीक्ष्णस्तुतत्त्वकस्तंभस्तादर्थ्यस्तार्दस्तटेश्वरः स्थूलस्थः
स्थावरः स्थाभाः स्थिरबुद्धिः स्थिरेन्द्रियः स्थिरज्ञानी स्थिरप्रीतिः
स्थिरः स्थितिः स्थिराशयः दामोदामोदरो दंभो दाडिमीकुसु
मप्रियः दारिद्र्यहा दमी दिव्यो दिव्यदेहो दिनप्रभुः दिनक
रो दिवानाथो दिवसेशो दिवाकरः दीर्घेशो दलनज्योतिर्दले
शो दलसुंदरः दलप्रियो दलाभासो दलपज्ज्यो दलप्रभः

© Dharmartha Trust J&K. Digitized by eGangotri

दलकान्तिर्दलाकारो दलसेव्यो दलार्चितः दीर्घबाहुर्दलश्रेष्ठो
दलत्वञ्चो दलाकृतिः दानवघ्नो दयासिन्धुर्दयालुर्दीप्तिवल्लभः
धनेशो धनदो धर्मी धनराजो धनप्रभुः धनप्रभो धनाध्यक्षो
धनमान्यो धनंजयः धीवरो धातको धाताप्युवो धूम्रछविर्धवः
धनिष्ठो धवलश्चैव धनकाम्यो धनेश्वरः धीरो धीरतरो धैत्र्युर्ध
रीशो धरणीप्रभुः धरानाथो धराधीशो धरणीनायको धरः
धराकान्तो धरापालो धरणीमण्डलप्रियः धराधरो धरोद्दण्डोध

© Dharmartha Trust J&K. Digitized by eGangotri

नराष्ट्रोधनीश्वरः नारदोनीरदोनेतानतिपूज्योनतिप्रि
यः नतिलभ्योनतीशानोनतिलुब्धोनतीश्वरः पांडवः
पार्थसंपूज्यः पाथोधिः प्रणतः पृथुः पृथिवीशः पृथ्वी
सूनुः पृथिवीभृत्परेश्वरः पुराणः पारदः पाथ्यः पांचाली
पालकप्रभुः पूर्वः पुरपतिः प्रेयान् प्रीतिदोप्रीतिवर्धनः
पार्वतीशः परेशानः पार्वतीहृदयप्रियः पार्वतीरमणः
पूतः पवित्रः पापनाशनः पात्रीपात्रालिसंतुष्टः परितुष्टः

© Dharmartha Trust J&K. Digitized by eGangotri

व॰
भै॰पं॰
५

5

उमात्मविः पर्वेशः पर्वतादेशः पर्वतनायकात्मजः फणा
गुणः फणानाथः फणीशः फणरत्नकः फणीपतिः फणी
शानः फेनबिंदुः फणाकृतिः बलभद्रोबलीबालोबा
लधीर्बलवर्धनः बलप्राणोबलाधीशोबलिदानप्रियं
करः बलिराजोबलिप्राणोबलिनाथोबलवर्धनः बलि
र्बलस्थबालेशोबालकप्रियदर्शनः भद्रीभद्रप्रदोभीमो
भीमसेनोभयंकरः भव्योभव्यप्रियोभूतपतिर्भूतविनाशकः

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri